
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)
अनुस्थानं कारिकं	—	दर्शन	अपूर्ण	·	3/7	164	संस्कृत	कागद	8	41	

M- 2966

शोधूनव अग्न्याधानं कार्त्तिके शुक्ले चि दिं च्यं न्ति सूर्यः॥ ॐ ॥आधानपद्धति ...मास... ग्रह...रं॥ +

श्रीगणेशाय नमः॥ गणनाथं नमस्कृत्य शारदां गुरुदेवतां॥ वैकल्पिकं मृषिछंदो देवताग्रस्य कर्मसु॥१॥ देवतानामभिध्या
नं वक्ष्ये संकल्पपूर्वकं॥ अग्न्याधानं द्विजेंद्राणां स्यात्कार्त्तिकविशाखयोः॥ रेवतीरोहिणीपुष्यमृगज्येष्ठोत्तरात्रये॥
माघादिपंचमासेषु श्रावणे चाश्विने तथा॥ मार्गशीर्षे यवाधानं ग्रहाग्नेरपवास्यते॥ अस्तान्तमास्तु पुण्ये स्त्रिचतुर्थ्यो
त्तरकालतः॥ स्नातृमानूयनस्त्रागे वापि नर्मुपरते थवा॥ मातुरुपरतो दध्यात्कनिष्ठः सोदराग्रजा॥ आषाढं कार्त्ति
कं पुष्यं भाद्रं चैवाधिमासकं॥ वक्रास्तमयसंक्रांतिग्रहणानि हि वर्जयेत्॥ मकरं कर्कटं कुंभं मीनं लग्नं च वर्ज
येत्॥ रिक्तां तिथिं व्यतीपातं वैधृतीच शनैश्चरं॥ चतुर्थाष्टमगं चंद्रं द्वादशं चंद्रमेव च॥ यावंत्यब्दा स्मतीतानि
निरग्नेर्विप्रजन्मनः॥ तावंति कृच्छ्राणि चरेद्धोमं दद्याद्यथाविधि॥ यावत्कालं स्वहोमी स्याच्छावव्यक्तोपत॥
तदानं चैव विप्रेभ्यो यथाहोमसमर्थ्ये वैत्॥ सम्धातमतश्चतुर्थ्युत्तरकालोत्तरकालं स्यात्मतो विभागादूर्ध्वं पितृभिसे

तथश्रा

तेमातरिम्रतायात्त्वानिरग्निस्त्वेनयावंतः संवत्सराः अतीतास्तावंतः कृच्छ्राः प्रायश्चित्तं। यद्दिहिरण्यादिना
क्रियतेतद्दातव्यं। सुहृद्भीरसूर्वैवपनं कृत्वातीर्थस्नानादिनासपत्नीकस्यात्मनःशुद्धिकारणं॥ ततः शुचिःसभा
र्यः प्राङ्मुखोपविश्यप्राणायामत्रयंकालज्ञानंच कृत्वा। आहृताग्नेः संध्याधानजनितप्रत्यवायपरिहारा
र्थंप्रायश्चित्तमहंकरिष्ये। ततोब्राह्मणहस्तेताम्रपात्रेवाआपः संस्थिरस्यादिब्राह्मणगोत्राद्दारभ्यानुकल्प
॥१॥ र्मीहमेवमंतंकृत्वाइदमेनावत्कृच्छ्रप्रत्याम्नायसाधनीभूतंहिरण्यंधान्यंभूमिंवाअन्यद्वातुभ्यमहंसं ॥१॥
प्रददे। अथवातीर्थयात्राद्वारानिर्धनश्चेत्॥ आवसथ्याधानाकरणजनितप्रत्यवायपरिहारार्थंवर्षसंख्या
कान्। कृच्छ्रान्तीर्थयात्रादियथासंभवप्रत्याम्नायेनाहंकरिष्ये। तत्रप्रथमप्रयोगेप्रायश्चित्तानंतरंआवसथ्याधाने
यानदिनेपूर्वाह्णेमाध्याह्निकंकर्मदेवतार्चनंकृत्वाभ्युदयिकंश्राद्धंकुर्यात्। प्राणायामत्रयंकालज्ञानंकृ
त्वा।

गोत्राणां नांदीमुखानां अस्मत्पितृपितामहप्रपितामहानां अमुकशर्मणां २ आवसथ्याधाननिमित्तमाभ्युदयिकं श्राद्धं मात
रं ९ जनन र्वं कं सांकल्पेन विधिनाहं करिष्ये। मातृपूजनं श्राद्धं प्रसिद्धं। ततो यज्ञोपवीती बद्धशिखो दर्भपाणिराचांतः
शुचिः सुस्नातया पत्न्या सह प्राङ्मुख उपविश्य होम्य द्रव्य दानं कुर्यात्। तद्यथा। प्राणायामं कात्वेज्ञानं च इस्याअ
धिकारे सत्य स्तत सायंप्रातर्होमपश्चाद्धिकर्म पिंडपितृयज्ञाद्यनुसंधार्थ होम्यद्रव्यदानमहं करिष्ये। ततो ब्रा
ह्मणहस्ते नांम्र पात्रे वा शिवा आपः संतु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु। इति प्रतिवाक्यं उदकपुष्पा
क्षतान् दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्चास्तु यच्छ्रेयस्तदस्त्विति शिरसि निषिंचेत्। यत्पापं तत्प्रतिहतमस्त्विति
भूमौ ततो दक्षता सहित पुष्पमुदकं गृहीत्वा हिरण्यगर्भे इत्यादिकं मंत्रमुच्चार्य नानागोत्रेभ्यो ब्राह्मणेभ्यः अ
मुकगोत्रोहं देवदत्तशर्मा अधिकारे सत्य स्तत सायंप्रातर्होमपश्चाद्धिकर्म पिंडपितृयज्ञाद्यनुसंधानार्थं सा

यनीमृतमिदं होम्यद्रव्यं संप्रदद्ये॥ ततोगणेशमिष्टदेवतां ब्राह्मणान्नमस्कृत्य प्राणायामत्रयं कालज्ञानं च स्मृत्वा आव
सथ्याधानमहं करिष्ये। तत्र मथितानेः स्थापनं। अग्नेरुत्तरतः। पात्रासादनं। पवित्रे द्वे स्रुवमयी आज्यस्थाली ताम्रमयी
चरुस्थाली॥ पालाशयस्मीधः प्रांचाघारौ समिद्धतमे आज्यभागौ चरो दक्षिणार्द्धतान्वैकल्पिकान्पदार्थान्नहं
करिष्ये। ततो अरणीमानं। यथा। प्रथमं १।२।३।४।५।६।७।८।९।१०।११।१२।१३।१४।१५।१६।१७।१८।१९।२०।२१।२२।२३।२४
२ इति दैर्घ्यमानं। विस्तारो यथा। प्रथमं।१।२।३।४।५।६। उच्छ्रायेतु प्रथमं १।२।३।४। इतच्चमानस्तु ज्ञानाय धरारणि २
मूलाधारायदक्षिणसव्यहस्तांगुष्ठपर्वप्रमाणमावर्तं संस्कृतमुद्रकर्म संस्थम् ऊर्ध्वं संस्थं क्रमेण कार्यं। एवमुत्तरार
णेः। अरणीस्वरूपमेवं ध्येयं। उत्तानाधः कर्तव्यारणिः। मूलसमीपादंगुलेन त्यक्त्वा तदुपरितनमंगुलत्रयं ज
घो। तदूर्ध्वमंगुलचतुष्टयमस्तत्तदुपरितनमंगुलद्वयं देवयोनिः। तदुपरितनमंगुलद्वयं वह्निः। तदूर्ध्वमंगु

लमेकं कटिः ॥ तदूर्ध्वमंगुलत्रयं उदरं ॥ तदूर्ध्वमंगुलं हृदयं ॥ तदूर्ध्वमंगुलद्वयं वक्षः ॥ तदूर्ध्वमंगुलं
ग्रीवा ॥ तदूर्ध्वमंगुलद्वयं वक्षः कर्णौ ॥ तदूर्ध्वमंगुलमरणिमुखं ॥ तदूर्ध्वमंगुलं कर्णौ ॥ तदूर्ध्वमंगुलं
नेत्रे ॥ तदूर्ध्वमंगुलं शिरः ॥ एवं सावयवमरणिस्वरूपं विविच्य निर्दिष्टोत्तरं ततो गंधपुष्पादिभिः पूजनं ॥
तत्प्रयोगः ॥ स्मार्तकर्मसाधनीभूतस्याग्नेः योनिरूपाभ्यामरणिभ्यां गंधपुष्पधूपदीपाच्छादनैवेद्यतां
बुलानि संपादयतां ॥ अरणिनमस्कारः ॥ ततोरणिस्वीकरणं मंत्रयोर्यथा स्मार्तकर्मसाधनीभूतस्या
ग्नेः इमे अरणी यानीमया परिगृहीते मया चेति पत्नी स्वकृत्याचार्यदंपती अरणिद्वयं संस्पृशेतां ॥ इमान्नि
पात्राणि मया परिगृहीतानीति संस्पृशेतां ॥ उत्तरारणेः ईशान्यप्रदेशान्मूलमध्यादष्टांगुलप्रमाणनि
ष्पन्नेः प्रमोनचतुर्दशांगुष्टयारत्नीखदिरपरिलेखः ॥ परीक्ष्य पूर्वोहेदिभिः खदिरपरिशुद्धिः ॥ अधरारणिकुंभ
नी

॥८॥

न्यष्टांगुलानितानिपादोरूसंधौ॥अथतोयानिद्वादशातानिमूर्ध्निक्षिकर्णेचग्रीवावक्षहृदयोरःश्रोण
यः॥द्वादशानामष्टांगुलानांमध्येचत्वार्यंगुलानिअवशिष्यंते।तानिचास्तियोनिरूपाणि।तेषांचतुरंगु
लानांमध्येअथस्तनमेकमंगुलमुपरितरितनमेगुलद्वयंवेस्यंगुलत्रयंपरित्यज्यअथतोपंचदशांगु
ष्ठतोदशामंयदंगुलंमध्येस्मितत्रमंथनं॥यज्ञियकाष्ठैःप्रज्वालनं॥स्थ्यादीनामनुस्मरणं॥त्वंनोअ
ग्नेसत्वंनोअग्नेइत्यादिद्वयोर्वामदेवऋषिःत्रिष्टुप्छंदःअग्नीवरुणौदेवतेइमंमेवरुणतत्वायामीति
सुनःशेपऋषिःगायत्रीत्रिष्टुभौछंदसीक्रमेण॥वरुणोदेवता॥एतेषांचतुर्णांमंत्राणांपापक्षयेविनियो ७
गः॥येतेशतमयाश्चाग्नेइतिद्वयोर्वामदेवऋषिःत्रिष्टुप्छंदः॥वरुणःसविताविष्णुर्विश्वेदेवमरु
तस्वर्कादेवताःप्रथमस्या॥द्वितीयस्याग्निर्देवताअनादिष्टहोमेविनियोगः॥उदुत्तमममितिसुनःशेपऋ

॥८॥

षिःत्रिष्टुप्छंदःवरुणोदेवतापाशान्मोकेविनियोगः।भवतन्नःसमनसावितिमंत्रस्यप्रजापतिऋषिःपंक्तिश्छंदःजात
वेदसोदेवतेअग्निआधानेविनियोगः।अयाश्चा।ग्नेरितिमंत्रस्यगौतमऋषिःगायत्रीछंदःदेवागातुविदोदेवताः
आज्यहोमेविनियोगः।भूर्भुवस्वरितिमहाव्याहृतीनांप्रजापतिऋषिःगायत्र्युष्णिगनुष्टुप्छंदांसिअग्नि
वायुसूर्यादेवताःगार्हपत्याहवनीयाधानेविनियोगः।त्वन्नोअग्नेसत्वन्नोअग्नेअयाश्चाग्नेश्चाग्नेयते
शतमीतिमंत्राणांवामदेवऋषिःत्रिष्टुप्छंदःअग्नीवरुणौदेवतेप्रथमयोःसौत्रामण्यावभृथेविनियोगः।
तृतीयस्याग्निर्देवताचतुर्थस्यवरुणःसविताविष्णुर्विश्वेदेवामरुतःस्वर्कादेवताःअनाज्ञातहोमेविनि
योगः।उदुत्तममितिमंत्रस्यसुनःशेपऋषिःत्रिष्टुप्छंदःवरुणोदेवतापाशोन्मोकेविनियोगः।अस्मत्ता
र्षादिकंविप्रोयजेद्वाजुहुयाद्विजपेद्वाध्यापयेद्वापिनलभेत्कर्मणांफलमितिस्मृतेः।अथवह्रयमस्थादि

अग्निं पवमानं। अग्निं पावकं। अग्निं शुचिं अदितिं। एताः प्रधानदेवताः स्थालीपाकेन चरुणा। अग्नीवरुणौ। वरुणं।
वरुणं। वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् अग्निं वरुणं जातवेदसो एताः पुनः आज्येन २

ग०३। प्रस्तरणं कार्यं। अथ देवताभिध्यानं। तत्र प्रजापतिं इन्द्रं अग्निं सोमं अग्नीवरुणौ अग्नीवरुणौ वरुणं वरुणं वरुणं सवितारं वि
ष्णुं विश्वान्देवान् मरुतः स्वर्कान् अग्नीवरुणं जातवेदसो एता देवता आज्येन। अग्निं वायुं सूर्यं चरुणा स्विष्टकृतं। देवाना
नुविदः। अग्निं वायुं सूर्यं। अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान्मरुतः स्वर्कान् वरु
णं प्रजापतिं एता देवताः आज्येन एता अंगप्रधानार्था देवता अस्मिन्कर्मण्यहं यक्ष्ये। अग्नेर्दक्षिणतो ब्रह्मास
नास्तरणं। अग्नेरुत्तरतो ब्रह्मवरणं। यथा दक्षिणहस्तं गृहीत्वा देवदत्तशर्मन् आधानाख्ये कर्मणि त्वं ब्रह्मा ॥४॥
भव भवामीति प्रतिवचनं। ब्रह्मणा ब्रह्मासने उपवेशनं। ततः सव्यहस्तेनाग्रं च प्रणीताचमसं निधाय तत्रोदकम रव्य
अग्नित्तुरतो भ्यासमासिच्यासनः पुरतौ भूमौ निधाय उदकमध्ये दक्षिणहस्तेनालभ्याग्नेरुत्तरतो निदध्यात्। ततः इध्मा
न्यादि त्रिभिस्त्रिभिर्दर्भैरग्नेः परिस्तरणं। पात्रासादनं। अग्निमपरेण येदुदगग्राणि प्राग्बिलसंस्थानि उत्त

त्रा
रेणचैनं गत्याएवुदग्बिलसंस्थानि च। पवित्रछेदनादर्भास्त्रयः पवित्रे। द्वे प्रोक्षणीपात्रं। आज्यस्थाली चरुस्था
ली संमार्गकुशाः उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यं। तंडुलाः चरव्याः। वाग्यमनं कृत्वा पवित्रीकरणं
प्रणीतानामुत्तरतः प्रोक्षणीपात्रं निधाय पात्रेण प्रणीतोदकमासेकः। पवित्राभ्यामुत्पवनं। प्रोक्षिण्यां पवित्रे निधाय
दक्षिणहस्तेन प्रोक्षणीपात्रं गृहीत्वा सव्यहस्ते तन्तो परिकरणं। दक्षिणहस्तांगुलिभिः प्रोक्षियपामुद्दिंगनंता
भिस्तासामेव प्रोक्षणं। अर्थवत्प्रोक्षकं पात्रप्रोक्षणं। असंचरे प्रोक्षणीनिधानं। आज्यस्थाल्यामाज्यनि
र्वापः। चरुस्थाल्यां प्रणीतोदकमासिंच्य तंडुलप्रक्षेपः। आज्याधिश्रयणं। उत्तरेण चरोरधिश्रयणं। ज्वाला
दि उभयोः पर्यग्निकरणं। चरोश्रपणं। अर्धश्रिते चरौ स्रुवस्य प्रतपनं। संमार्गकुशैः संमार्जनं प्रणीतोदके
नाभ्युक्षणं पुनः प्रतपनं। देशे निधानं। उत्तरत आज्योद्वासनं। चरुं पूर्वेण। चरोरुद्वासनं। मांज्यं माज्यमपरेण।

न्नरतः। पवित्राभ्यामाज्योत्पवनं। अवेक्षणं। अपद्रव्यनिरसनं। प्रोक्षण्याः सम्नुपवनं। उपयमनानुकुशानादायतिष्ठतः

समिधाधानं। सपवित्रेण हस्तेन प्रोक्षण्युदकेनाग्नेः पर्युक्षणं। पवित्रे प्रणीतासु धाय दक्षिणजानुनिपातः ब्रह्मणान्वारंभः। नि

एताभ्यां च चतुर्दशाहुतिषु ब्रह्मणोन्वारंभः। नान्यासु स्रुवेण होमः। प्रसारितसंहतांगुलिसव्यहस्तं सोपयहं हविर्नि

१४॥ धायदक्षिणेन जुहुयात्। अग्नेरुत्तरविभागे पूर्वाघारं प्रांचं ऋजुं संततं दीर्घं। दक्षिणविभागे उत्तराघारं मीदृशमेव। १४॥

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम इति सर्वत्र ॐकारपूर्वको मंत्रोच्चारः। आहुतिषु सर्वत्र स्रुवसाध्ये होमे स्रुवा

हुतिं प्रोक्षणीपात्रे संस्रवप्रक्षेपः। ॐ इंद्राय स्वाहा। इदं मिंद्राय न मम। समिद्धतमे आज्यभागौ ॐ अग्नये स्वाहा। इदमग्न

ये न मम। ॐ सोमाय स्वाहा। इदं सोमाय न मम। आज्यभागानंतरं स्वस्त्यन्नो अग्नेइत्येका। इदमग्नीवरुणाभ्यां न मम। सत्त्व

नो अग्ने॰ इदमग्नीवरुणाभ्यां। इमं मे। इदं वरुणाय। तत्त्वा यामि। इदं वरुणाय। ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा

वितनाम हांतः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवे
भ्यो मरुद्भ्यः स्वर्केभ्यो न मम। अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि। अया नो यज्ञं वहास्यया नो धि
हि भेषजं स्वाहा। इदमग्नये अयसे न मम। उदुत्तमं। इदं वरुणायादित्यायादितये न मम। भवतन्नः। इदं जातवेदोभ्यां न
मम। ततः स्थालीपाकमभिघार्य स्रुवेणाज्यं जुहुयात्। ॐ अग्नये पवमानाय स्वाहा। इदमग्नये पवमानाय न मम। ॐ अ
पावका
ग्नये [illegible]ये स्वाहा। इदमग्नये पावकाय। सर्वत्र त्यागांते न ममेति सर्वत्र। ॐ अग्नये शुचये स्वाहा। इदमग्नये शुचये
न मम। ॐ अदित्यै स्वाहा। इदमदित्यै। ततः त्वन्नो अग्न इत्याद्यैः पूर्वोक्तैरष्टभिर्मंत्रैः पुनराज्यं जुहुयात्। पूर्ववत्। ततः
स्थालीपाकेन स्विष्टकृतं। ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। ततो नवाज्याहुतयः। अयास्यग्ने।
र्वषट्कृतं यत्कर्मणात्यरीरिचं देवा गातुविदः स्वाहा। इदं देवेभ्यो गातुविद्भ्यः। ॐ भूः स्वाहा। इदमग्नये। ॐ भुवः स्वाहा। इदं वायवे।

म६॥

ॐ स्वाहा। इदं सूर्याय। स्वक्तो अग्ने इदमग्नी वरुणाभ्यां। स स्वक्तो अग्ने इदमग्नी वरुणाभ्यां। अयाश्चाग्ने। इदमग्नये। ये ते श
तं। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम। उदुत्तमं। इदं वरुणायादित्यायादितये न मम। ॐ प्रजाप
तये स्वाहा। इदं प्रजापतये। सर्वत्र सांगं तेऽव्यप्रक्षेपः। एवमाधाने। पञ्चत्रिंशदाहुतयः। ततोऽग्निपरिस्तरणरूपस्य बर्हिषो होमः।
संस्रवप्राशनं। पवित्राभ्यां मार्जनं। अग्नौ पवित्रप्रक्षेपः। ब्रह्मणे वरदानं। ब्रह्मन्। अस्यावसथ्याधानस्य कर्मणोऽङ्गतया विहि
तोऽयं ते वरः प्रतिगृह्यतां। द्यौस्त्वा ददातु। पृथिवी त्वा प्रतिगृह्णातु। इति मंत्रस्य ब्रह्मणो जपः॥ प्रणीताविमोकः॥ अनुच्छिष्ट
पाकेन ब्राह्मणभोजनं। ब्राह्मणपादप्रक्षालनासनेऽपवित्रय अभ्यर्च्यान्नं परिवेष्य संकल्पयेत्। यथा ब्राह्मणभाः आवसथ्याधा
न कर्मणोऽङ्गतया विहितं भोजनसाधनीभूतमन्नं दत्तं दास्यमानं चात्र ते अमृतरूपेण संपद्यतां। इदं ब्राह्मणाय। विश्वे
सति पंचत्रिंशद्ब्राह्मणभोजनं। आवसथ्याधाने मित्रं यथालाभोपपन्नान्नेन पंचत्रिंशद्ब्राह्मणान् भोजयिष्ये। यां तु म

नि नै

ग६॥

देगणा इति मातृविसर्जनं। ततोऽग्निनमस्कृत्य सर्वेषां नमस्करणं। आधानमध्ये यदि विलिष्टमापत्तौ ततो मातृ
पूजनं श्राद्धं विना सकलमाधानमावर्त्तते। अग्निस्थापनोर्द्धपरिप्रणीताविमोकपर्यंतं पदार्थमध्ये विलि
ष्टमापद्येत देवताभिधानादि सर्वमावर्त्ततेन पूर्वसंकल्पादिकं। ततो ब्राह्मणभोजनं मिति। ब्राह्मणभो
जनात्प्राग्यदि पत्नी रजस्वला जायते सूतकं मृतकं वा तदा मातृपूजनादि सर्वमाधाने मावर्त्तते। सु
चित्वे जाते आधानानंतरं मणिकावधानात्प्राग्यदि पत्नी रजस्वला सूतकं मृतकं वा तदा सुचित्वे
ते मणिकाधानं पंचमहायज्ञाः सायंप्रातर्होमारंभः कार्याः। केचिदेवं वदंति। अग्निस्थानादुपरि
यदि पत्नी रजस्वला सूतकं मृतकं वा जाते। तदा आचक्षुचित्वाद्यग्निधारणं कार्यं। सुचित्वे जाते दु
ष्यादिकं देवतानुस्मरणादि सकलमाधानसमाप्तिः कार्या। नाधानावृत्तिः। ततो मणिकादिसर्वं

कार्य॥ एतन्मध्याग्निकानां गी कुर्वंति॥ कुतः॥ अर्वाग्द्वादशाहाच्चेदाधाने स्त्री रजस्वला॥ आवर्त्तेन तदाधानं
मात्र रजासमन्वितमिति वचनात्॥ प्रायश्चित्तं पुरा कृत्वा आधानस्य दिने ततः॥ कुर्यान्माध्यान्हिकं स्ना
नं देवतार्चनं तिकं श्राद्धं होमस्य दानं च कुर्यात्संकल्पमेकचा वैकल्पिकपदार्थाश्रमाननिर्दृशाद
॥७॥ रजनं स्वीकारो मंथनिष्पत्तिः रवरक्ठडिस्तु मंथनं॥ अग्निस्थापनमन्वादिस्मरणं च ततो भवेत्॥ दे ॥७॥
वतानामभिध्यानं वरणं ब्रह्मणस्ततः॥ प्रणीय च परिस्तीर्य पात्रासादनमिष्यते॥ छित्वा पवित्रके हेतु
संस्कृत्य प्रोक्षणीस्ततः॥ पात्रप्रोक्षणमाज्यस्य निर्वपेच्चरुपात्रके॥ आसिच्योदकमायापस्तंडुलानां
चतन्वके॥ अधिश्रित्योभयं पश्चात्पर्यग्निकरणं ततः॥ श्रपणं च चरोरेव कुर्यादूर्ध्वश्रितेन तत॥ स्रुवौ
वं प्रतपनादि स्याद्दुदासोभयमेव तत॥ उत्तरे वेध्यथाज्यं तु प्रोक्षण्युत्पवनं ततः॥ कुशादानं समित्क्षेपः॥

प्रोक्षणीवारिणा ततः। पर्युक्ष्याग्निं पवित्रे चेत्प्रणीतासु निधाय च। निपात्य दक्षिणं जानुं ब्रह्मणान्वारब्धे तु कुर्वी:
वाग्यतो जुहुयादाद्यौ स्रुवेणाज्यादिकं हविः। आघारावाज्यभागौ च स्वस्व विस्याडिकाष्टकं। स्रुवेणाज्येन चै
वैनाञ्जुहुयाद्द्वादशाहुतीः। स्थालीपाका चात्तमं तु स्वस्व रत्यष्टकं पुनः। स्विष्टसृञ्चान्तदोषेण देवा गातु
विदस्ततः। आज्येन नवस्तराद्या बर्हिर्होमस्ततो भवेत्। संस्रवप्राशनं कुर्यान्मार्जनं प्रतिपादनं। वरदानं
प्रणीतानां विमोको विप्रभोजनं। यां तु मात्रगणानुक्ता विसृजेन्मातृकं गणं। अग्नये पवमानाय अग्नये पा
वकाय च। अग्नये शुचये चेति त्रैधेनुहोम्याधानकर्मणि। ७। इ॥ श्रीगंगाधरभट्टविरचितायां स्मार्तपदार्थ ति
संग्रहे आधाने समाप्तं। अथ मणिकाधानं। तत्र प्रथमप्रयोगे स्वरस्थानाद्रथ्यैरेव देवास्तु ध्वस्य महानसे
चुल्ल्यां ऋपे च भूसंस्कारान्विना निधाय शुचिनोदकेन पाद्यः कार्यः। ततो ब्राह्मणपादप्रक्षालनं उपवेशनं प्र

प्रातरनुवाके वि॰ आपोहिष्ठेतितिसृणांसिंधुद्वीपऋषिःगायत्रीछंदःआपोदेवता। पर्ण्णकषायो ५

णायामत्रयंकालज्ञानंसत्वापूर्ववत्कृतोत्तारंमणिकावधाननिमित्तंआभ्युदयिकंश्राद्धंमातृपूजनपूर्वकमहंकरि
ष्ये।ततोमातृपूजनंश्राद्धंचसमाप्यततःशुचिःसभार्यःप्राङ्मुखउपविश्यप्राणायामत्रयंकालज्ञानंचसत्वाउद
कार्थसिध्यर्थंमणिकावधानमहंकरिष्ये।तत्रदेवस्यत्वेतिमंत्रस्यप्रजापतिऋषिःगायत्रीछंदःअग्निर्देवता
१८ अभ्यादानेविनियोगः।इदमहंरक्षसामितिमंत्रस्यप्रजापतिऋषिःयजुःरक्षोघ्नीर्देवतारूपावटखनेखने १८
विनियोगः।समुद्रोसीतिमंत्रस्यसाहम्निध्यायनऋषिःयजुःवायुर्देवताच्यवनवातहोमेविनियोगः।आपो
रेवतीरितिमंत्रस्यपरमेष्ठीऋषिःत्रिष्टुप्छंदःआपोदेवताउदकनिषेकेविनियोगः।ततोदेवस्यत्वाआददेना
येसीतिमंत्रमुक्त्वाच्याभ्यादानं।इदमहमित्यनेनमंत्रेणईशानकोणेअवटपरिलेखः।उदकोपस्पर्शनं।रोउं
वाराहसंपैत्रमाग्नुरंचाग्निचारिकं।उत्साम्रंयंमरवोदं ५ आलभ्यात्मानमेवच्या।अभ्यारवननं।प्राच्यांदिशि

पांसूत्थापनं। अवटे कुशास्तरणं। अक्षतानामावेशनं यवाः॥ अक्षतारिष्टकसर्षपदधिदूर्वाप्रक्षेपः। ततो हस्ता
भ्यां मणिकं गृहीत्वा समुद्रोसि नभस्वानार्द्रदानुः शंभूरिति मंत्रमुक्त्वा अवटे मणिकावधानं मणिकस्य दृढीक
रणं। आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च। रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते स्य २
वयो धात् इत्यनेन मंत्रेण मणिके एकेन कलशेनोदकमासिंचेत्। द्वितीयेनापो हि ष्ठेति तिसृभिः। अत ऊर्ध्वं श्रौत
स्मार्तक्रियापाकार्थं मणिकोदकेनैव कार्यं। सति संनिधाने पुत्रः शिष्यो वा पत्नी वा उदकासेकं कुर्यात्। ततो ब्रा
ह्मणपादप्रक्षालनमासने चोपविश्याभ्यर्च्यान्नमुद्दिष्टमन्नं परिवेष्य संकल्पयेत्। ब्राह्मण अस्य मणिका
धानकर्मणोंगतया विहितं सायनीभूतमन्नं दत्तं दास्यमानं चात्र सेः अमृतरूपेण संपद्यतां इदं ब्राह्मणाय
न मम। यांतु मातृगणा इति विसर्जनं। उपस्थाप्याग्निं पचेदन्नं वारिणाक्षुधिनाख्यापीः। मानृप्रजातेतः श्राद्धं सं

कन्नऋषिदेवताः॥ स्मरस्याभ्यादानमवटंपरिलिख्यमस्त्रेणोदपः॥ खननोद्धपनेचात्रकुशादीनांस्मृतिस्तनः॥
अवटेमणिकाधानमुदकासेचनंस्विष्टं॥ भोजनंब्राह्मणोदयान्मातृणांचविसर्जनं॥ ६॥ इतिस्मार्त्तपदार्थ
संग्रहेमणिकाधानं॥ ६॥ ॥ ७॥ अथपंचमहायज्ञाः॥ तत्रप्रथमप्रयोगेस्वरस्नानादन्यरेकदेशंमहान
॥१९॥ सेस्नात्वामणिकोदकेनश्राद्धंपंचमहायज्ञार्थंपृथक्पाकद्वयंकार्यं। ततोब्राह्मणान्पादप्रक्षालनोपवेशने ॥१९॥
स्नात्वासंकल्पंकुर्यात। प्राणायामकृत्यंकालज्ञानंच स्नात्वागोत्रोच्चारणपूर्वकंनांदीमुखंपितृमातृ
मातामहानांचसंकीर्त्यपंचमहायज्ञारंभनिमित्तमाभ्युदयिकंश्राद्धं मातृपूजनपूर्वकमहंकरि
ष्ये। ततोमातृपूजनंचश्राद्धंसमाप्यपादप्रक्षालनंद्विराचमनंचस्नात्वाबद्धशिखःकृतशिखोगृही
तोपयह्युश्राः सपत्नीकः पश्चादग्नेरुपविश्यपात्रेमणीकोदकमासिच्य तदालम्भ्यपद्वादेवेहेड

नमितित्रिसूत्रस्यप्रजापत्यश्विसरस्वत्याऋषयः।अनुष्टुप्छंदः।अग्निवायुसूर्यादेवताःसौत्रा
मण्याचमनार्थेविनियोगः।ततस्त्रिःसूत्रंजपेत्।तेनोदकेनान्नुच्छिष्टपाकप्रोक्षणंगृहप्रोक्षणं।ततोबहिर
ग्नेगंधपुष्पैःसंपूजनं।मुखंयःसर्वदेवानांहव्यभुक्कव्यभुक्तथा।पितॄणांचनमस्तस्मैविष्णवेपावका
त्मने।इत्यनेनमंत्रेण।प्राणायामत्रयंकार्यान्नानंचस्वस्यापरमेश्वरप्रीतयेपंचमहायज्ञानहंकरिष्ये।
तत्रब्रह्मणंप्रजापतिंगृह्याःकश्यपमनुमतिंपर्जन्यंअपःपृथिव्यौधातारंविधातारं।वायुं४प्रा
चीदिक्शादक्षिणांदिक्शांप्रतिचीदिक्शांउदीचीदिक्शां।ब्रह्माणंअंतरिक्षंसूर्यं।विश्वान्देवान्विश्वानि
भूतानि।उषसंभूतानांचपतिंपितॄन्यक्ष्मासंकाश्यपगोत्रान्अस्मत्पितृपितामहप्रपितामहान्ब्र
ह्महरिहरशर्मणः।गोत्रान्मातामहप्रमातामहवृद्धप्रमातामहान्शर्मणः४गाः।सर्वाणिभूतानिश्वानोवा

यसांभ४ स्य याकार४ हंताकाश्वल्लीभिः ४ निधाय दक्षिणेन जुहुयात्। अग्नये स्वाहा। इदं अग्नये
न मम। प्रजापतये स्वाहा। इदं प्रजापतये न मम। गृह्याय स्वाहा। इदं गृह्याय॰ कश्यपाय स्वाहा। इदं
कश्यपाय। अनुमतये स्वाहा। इदमनुमतये॰ ततो मणिकसमीपे पश्चिमभागे उदकुंभसंस्थानि त्री
॥१८॥ णि च बलिहरणानि। ॐ पर्जन्याय नमः। इदं॰ अद्भ्यो नमः। इदमद्भ्यो न मम। पृथिव्यै नमः। इदं पृथि ॥१८॥
व्यै। देहल्यंतरे द्वे कुर्यात्। द्वारदेशे प्राङ्मुखो वा उदङ्मुखो वा उपविश्य उदक्संस्थे धात्रे नमः॰ विधात्रे इदं धात्रे॰
नमः। इदं विधात्रे। ततोऽग्नेः पश्चात्प्रतिदिशं च चत्वारि प्राच्यादिषु दिक्षु क्रमेण वायवे नमः ४ इदं वायवे ४
एषां चतुर्णां क्रमेण पूर्वतोऽन्यानि बलिहरणानि च चत्वारि। ॐ प्राच्यै दिशे नमः। इदं प्राच्यै दिशे। द
क्षिणायै दिशे नमः। इदं॰ प्रतीच्यै दिशे॰ इदं प्र॰ उदीच्यै दिशे नमः। इदमुदीच्यै। चतुर्णां मध्ये प्राक्

संस्थानि त्रिणि। ॐ ब्रह्मणे नमः इदं ब्रह्मणे न मम। अंतरिक्षाय नमः इदमंतरिक्षाय। ॐ सूर्याय नमः इदं सू-
र्याय। त्रयाणामुत्तरतो द्वे प्राक्संस्थे। ॐ विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यः। विश्वेभ्यो भूतेभ्यो न-
नमः इदं विश्वेभ्यो भूतेभ्यः। ताभ्यामुत्तरतो द्वे प्राक्संस्थे। उषसे नमः इदमुषसे। भूतानां च पतये नमः।
इदं भूतानां च पतये। अथान्नशेषं पिंडितं कृत्वा प्राचीनावीती दक्षिणामुखो भूत्वा मध्यस्थबलित्रया-
द्दक्षिणतो दद्यात्। ॐ पितृभ्यः स्वधा नमः इदं पितृभ्यः स्वधा न मम। पुनर्यज्ञोपवीती भूत्वा प्राङ्मुखो
मणीकोदकेन च प्रक्षाल्य बलित्रयाद्वायव्यां दिशि निनयेत्। यक्ष्मैतत्ते निर्णेजनं इदं यक्ष्माय न मम॥
अथ नित्यश्राद्धं षट्पौरुषं। तत्र प्राचीनावीती दक्षिणामुखो द्विगुणदर्भैस्तिलोदकेन सर्वं कुर्यात्। विश्व-
वे सति पित्रादेरेकैकस्य यदा त्रीन्त्रीन् ब्राह्मणान्भोजयेत्तदभावे एकं ब्राह्मणं नित्यश्राद्धं भवति। असामर्थ्ये

यदि पित्रादेरेकैकस्यैकैको ब्राह्मणस्तदा षट्प्रयंति। तत्राप्यसक्तौ वर्गद्वयस्य द्वौ। तत्राप्यसक्तौ वर्गद्वयस्या-
प्येकं। तत्राप्यशक्तौ पात्रे यथासंभवमन्नमुद्धृत्य संकल्पयेत्। तत्र पदार्थक्रमः। उदङ्मुखानां ब्राह्मणानां पाद-
प्रक्षालनं हंतकार ब्राह्मणस्य च कुशोत्तरेष्वासनेषूपवेशनं उदङ्मुखानां भूर्भुवः स्वरिति क्षमध्वमिति हंत-
॥११॥ कार ब्राह्मणस्य प्राङ्मुखस्योपवेशनं तूष्णीं। काश्यपगोत्राणां अस्मत्पितृपितामहप्रपितामहानां देवदत्तयज्ञ- ॥११॥
दत्ताग्निदत्तशर्मणां वसिष्ठगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां विष्णुमित्रयज्ञमि-
त्ररुद्रमित्रशर्मणां इदमासनं संपद्यतां। ततो गंधादिदानं। काश्यपगोत्रेभ्यः अस्मत्पितृपितामहप्रपिता-
महेभ्यः वसिष्ठगोत्रेभ्यः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः अमुकशर्मभ्यः गंधपुष्पधू-
पाच्छादनानि निष्क्रयाः संपद्यंतां। गंधपुष्पधूपाच्छादनानिष्क्रयैः अक्षय्यनित्यश्राद्धस्य पितॄणां पूजनं

विधिवद्दत्वा। आचमनं। ततोग्नौजनानिहस्तप्रक्षालनंभक्ष्यपरिवेषणं। पात्रालंभनं। पृथिवीतेपात्रंद्यौ
रपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वधाततोब्राह्मणदक्षिणहस्तांगुष्ठंगृहीत्वान्नेन
वगाहयेत्। इदंविष्णुरित्यवा। अपहताइतितिलप्रकीरणं। उदकोपस्पर्शनं। ततोगृहसिद्धंसर्वान्न
परिवेषणं। अन्नसंकल्पः काश्यपगोत्राः अस्मत्पितृपितामहप्रपितामहाः देवदत्तयज्ञदत्ताग्निदत्तश
र्माणः वसिष्ठगोत्रा अस्मन्मातृपितामहप्रपितामहवृद्धप्रपितामहाः विष्णुमित्रयज्ञमित्राग्निमित्रशर्माणः
एतद्वोन्नंदत्तंदास्यमानंचातृप्तेः अमृतरूपेणसंपद्यतां। इदंगोत्रेभ्यः अस्मत्पित्रादिभ्यः देवदत्तादि
शर्मभ्यः अस्मन्मातामहादिभ्यः विष्णुमित्रादिभ्योदत्तंदास्यमानंचनमम। अन्नसंकल्पांतमेवनित्य
श्राद्धं। अथब्रह्मयज्ञः। अग्निमपरेणस्वासनेदर्भास्तरणं। ततोपविश्यांजलिमध्येकुशाधारणं। दक्षि

हूतिम्
णेजनावंजलिनिधानं ३ ततॐकारमहाव्याहृतीस्तोगायत्रींवोच्चार्य ३ धेस्वादिभिस्तिस्त्रःपंचवायथाश
क्त्याधिकावाकंडिकाःपठेत् अंते ॐस्वस्तीतिब्रूयात् उदीच्यांदिशिकुशाग्निरसनेसंहितासमाप्य
वातपथमारभेत् तदंतेपुनःसंहितायां २ शेषमन्नमस्त्विति अनंतरंहंतकारब्राह्मणमस्थगंधादिना
१२ र्चनंभोजनेसर्वान्नपरिवेषणं ब्राह्मणहस्तप्रक्षालनदानं दत्वोदङ्मुखउपविश्योदकंगृहीत्वा १२
सनकादीन्मनुष्यान्स्वकीयान्अपरान्विचिंतयेत् हंततेनमः इदंमनुष्येभ्योनममासर्वेषामे
वोपोशानदानं ३ थोयथासुखंजुषध्वं इत्युक्त्वानमस्कुर्यात् अनिर्धनत्वायदिब्राह्मणो
न्नेनतृप्तिर्नास्तितदानाम्रपात्रेसर्वान्नस्योद्धरणं अभिघारणंप्राचीनावीतीदक्षिणामु
खोदर्भतिलोदकंगृहीत्वासंकल्पयेत् तद्यथा गोत्राः पिता२शर्माणः मातामहाः३शर्मा

ण॥९॥तद्दत्तान्नममृतरूपेणस्वधासंपद्यंतां।इदंगोत्रेभ्यःशर्मभ्यःमातामहेभ्यःशर्मभ्यः।इदंनमम।ब्रह्मस्य
ज्ञाश्चपूर्ववत्।अन्यस्मिन्नाम्रभाजनेअन्नमुद्धृत्योदकपुरस्तदुपविष्टयोदकंगृहीत्वासंकल्पयेत्।हंते
तिइदमन्नंसंप्रददे।इदंमनुष्येभ्योनमम।ततोदेवतानैवेद्यंसंकल्पः॥विष्णोनैवेद्यंसंपद्यतां।इदंविष्णु
वेनमम।ततःपूजनं।गोग्रासः।सुरभिर्वैष्णवीमातानित्यंविष्णुपदेपदे।गोग्रासंचमयादत्तंसुरभे
देविनमोऽस्तुते।इदंगोभ्योनमम।इत्यनेनमंत्रेणगोग्रासंसंकल्पयेत्।पिपीलिकाःकीटपतंगिका
श्वाक्षुधिताःकर्मणिबद्धबद्धाः।प्रयांतुतेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु।अनेन
मंत्रेणसर्वभूतार्थबलिंगृहीत्वागणेद्यात्।यमोऽसियमदूतोऽसिवायसोऽसिमहाभुजे।इदमन्नंमया
दत्तंवायसःप्रतिगृह्यतां॥इदंवायसबलिः।द्वौश्वानौश्यामशबलौवैवस्वतकुलोद्भवौताभ्यां

१२ मन्नं मया दत्तं रक्षेतां पथि मां सदेति। अनेन श्वानबलिः। एतद्बलित्रयं बहिर्दद्यात्। गोदोहनमात्रं वेलांती १२
क्षेत। अतिथिपूजनं भिक्षात्रयं नियमेन दातव्यं। विश्वेस स्वयं निवारितं। ततः पादौ प्रक्षाल्याचम्य अ
प्रतिष्ठतीत्यादि बालवृद्धादीन् भोजयेत्। यांतु मातृगणाः सर्वे पूजामादाय सत्वराः। इष्टिं च
विसृज्य दत्त्वा पुनरागमनाय च। इत्यनेन मंत्रेण नमस्कृत्य विसर्जयेत्। अथ श्राद्धश्लोकाः। उद्धृत्या
ग्निं पवेदन्नं मणिकस्यात्र वारिणा। श्राद्धाय कृततो न्यं च पंचयज्ञार्थमेकचामात्र पूजां ततः श्राद्धस्य
स्याग्निमपरेणतु। उपविश्याग्निमंत्रायः सो स्थाने च द्वितीयकं। अर्चनं च यमे साणनूकालसंयक्त
पूरयत्वादेवतानामभिध्यानं कृत्वा पात्रेन्नमुद्धरेत्। अभिधार्य घृताक्तेन पर्युक्ष्य चैव वारिणा। होमो
कृतबलिश्वान्यं नित्यश्राद्धं समाचरेत्। प्रक्षाल्य पादावुपविश्य विप्रान्दत्त्वासनं पूजनमेव तेषां। प्रक्षा

त्वनंभोजनविप्रपाणेरन्नंतदालभ्यतिस्तोदवारि।सत्याम्नसंकल्पामिदंहिनिःस्वंश्राद्धंपुराणामुनयोवदंति।आस्तीर्य
स्वासनेदर्भानुपविश्यकुशाग्रयं।धारयेदन्नजलौतंचदक्षिणेतंतः।पठेनु।ॐकारंव्याहृतीस्तिस्रोगायत्रीसंहि
च तादिकं।ॐकारंचतथांतैःसूक्तिदर्भान्नूदिपेद्गुरुः।हंतकारस्यविप्रस्यपूजनंपरिवेषणं।हस्तप्रक्षालनंसंकल्प
स्यपोशानंचसर्वतः।नैवेद्यंदेवतानांचस्वस्थानुज्ञापयेद्द्विजान्।गोग्रासंबलयश्चाथभिक्षादानादिकंततः।यां
तुमायुत्तगणानुक्त्वामात्रणंचविसर्जनं।एतेपंचमहायज्ञायावज्जीवंमनुष्ययोः।अष्टधाविभक्तस्या
न्हः पंचमेविभागेतस्मिन्मुख्यकालेयदिसंभवतितदास्तमयात्कार्याः।प्रमादात्पंचानामेतेषांलोपेअ
दृष्टः।प्रायश्चित्तं।मत्स्यायदिलोपःक्रियतेतदाहस्तः।एतेषांपंचानांमध्येएकस्यद्वयोर्वालोपोभवति
उपवासःप्रायश्चित्तं।अनादिष्टंचा।सतिसंभवेहविष्यान्नेन।घृतामिश्रितान्नेनकार्याः।असतियने

यस्मिन्निग्रहेहूयतेतेनापिकार्याः।मसूरिकोद्रवमाषकुलित्थकोद्दालककोठद्रुष्टामेध्यसंस्पृष्टैः पंचमहाय
ज्ञाः सर्वथानकार्याः।एतेसर्वेहोमेषुत्याज्याः।एतान्विहाययत्किंचिद्भोजनायान्नंसंकल्पितंतेनकार्यं।
तदभावेसर्वपत्रमूलफलैश्चतथापयोदधिघृतैश्चकुर्यात्।तदास्रुवेण।सर्वेष्यान्नाद्यस्यान्नाद्यस्यासंभवे
प्र१४॥ उदकेनांजलिनाकुर्यात्।अभिघारणंघृतेनदध्नापयसावा।उदकेनवाकेचित्तिलतैलेनकुर्वंतिनान्यतैले ॥१४॥
नाभ्यरैस्तैलमात्रंवर्जयंति।एवंयःकुरुतेनित्यंपंचयज्ञानगृहाश्रमी॥सयातिपरमंस्थानंयत्रविश्वेश्वरोह
रिः॥५७॥ ॥इतिप्रयोगपद्धतौपंचमहायज्ञाः॥५७॥ ॥अथसायंप्रातर्होमविधिः॥ ॥तत्रप्रथमप्रयोगेअग्ने
कदेवतोपस्थापनंकार्यः।आसनपादप्रक्षालनप्राणायामत्रयंकालज्ञानंचकृत्वाक्रमेणगोत्रोच्चारंस्वस
स्यासायंप्रातर्होमारंभनिमित्तंआभ्युदयिकंश्राद्धंमातृपूजनपूर्वंकरिष्ये।ततोमातृपूजाश्राद्धप्रागुक्तमया
मंहंच

द्वेःसमाप्यसंध्योपासनंचपत्न्यासहाग्नेःपश्चादुपविश्यप्राणायामत्रयंकालज्ञानंचस्मृत्वापरमेश्वरप्रीतयेसायंहोममहंकरिष्ये॥तत्र
अग्नयेस्वाहाप्रजापतयेस्वाहेत्यनयोर्मंत्रयोःप्राप्योपुगाऋषयःगायत्र्यनुष्टुभौछंदसीक्रमेणअग्निप्रजापतीदेवतेहोमेवि
नियोगः।तत्राग्निंप्रजापतिंदूआत्मप्रुद्धैरस्तैर्वोहंयक्ष्ये।ततोग्निमपरेणोत्तरेणवापात्रोपकल्पनं।उपयमनकुशाः।समिधः३
इंकेहोमद्रव्यंचेति।उपयमनान्गृहीत्वासव्यहस्तकरणं।अतऊर्ध्वंवाग्यमनंजपपर्यंतं।तिस्रःसमिधोगृहीत्वोपस्थाय
स्तिपर्यन्तमाघारद्वयात्।पश्चादग्नेरुपविश्यपर्युक्षणं।नक्षिकयाग्रेहस्तीकरणं।दक्षिणजानुनीपातनं।इध्मसव्यहस्त
उसास्तिमसंहतांगुष्ठैर्निधानं।दीमितमेचलिततराविहेमप्रक्षेप्तौदक्षिणपाणिनाहोमः।ॐअग्नयेस्वाहा।इदमग्नयेनम
म।ॐप्रजापतयेस्वाहा।इदंप्रजापतयेनमम।त्यागांतेद्रव्यप्रक्षेपः।अतऊर्ध्वंजान्वोःस्थितांजलिरग्निमुखोजपेत्।
समास्त्वेतिनवर्चस्याग्निर्ऋषिःत्रिष्टुप्छंदःअग्निर्देवताअग्निस्तुतौविनियोगः।समास्त्वेतिनवर्चस्यजपः।नमस्कारः।७

स्मवंदनं। यातुमातृगणाः सर्वे रक्षन्तु तावि सर्जनं। उषःकाले स्नानं संध्यां च कृत्वा सूर्योदयात्पूर्वं प्रातर्होमः। तत्र पत्न्या सह प
क्षाद्देशे पवित्रयप्राणायामत्रयं। कालज्ञानं च कृत्वा परमेश्वरप्रीतये प्रातहोमं करिष्ये। तत्र सूर्याय स्वाहा। प्रजा
पतये स्वाहेत्यनयोर्मन्त्रयोः प्रियमेधा ऋषयः। गायत्रीत्रिष्टुभौ छंदसी क्रमेण सूर्यप्रजापती देवते होमे विनियोगः। तत्र
॥१५॥ दक्षिणतं कुले रक्षसे नेर्वाहं यक्ष्ये। ततोऽग्निमपरेणोदगग्रं प्राक्कुसंस्कृत पात्रासादनं। अथैवमनन्तरतः प्रागग्रोदक्कुसंस्कृ उपय ॥१५॥
मन कुशाः समिधः उदकं होमद्रव्यं चेति। उपयमनकुशादानं समिधाधानं। वाग्यमनं। पर्युक्षणं। दक्षिणजानुनी
पातः प्रदासेवी होमः। सूर्याय स्वाहा इदं सूर्याय न मम। प्रजापतये स्वाहा इदं प्रजापतये न मम। ततो विश्वाडित्यनुवाकेन
पेनूपस्थानं षोडशिकं वित्त रश्यात्र सिद्धस्तात्वे हनलिरिपतं। एवं सायंप्रातर्होमौ। अस्तमिते सूर्ये प्रतीच्यां दिश्ययाव
ल्लोहितत्वं दृश्यते तावत्सायंप्रातहोमस्य मुख्यकालः। यद्वा अष्टघटिकात्मकः। नवघटिको वा। तत उपरि प्रातर्होमात्पूर्वं

नादिष्टं दत्वा सायंहोमः। तत्राप्यसंभवे लोपश्चेन्नित्यस्नानलोपे संध्यालोपे प्रातर्होमलोपे स्नात्वाष्टोत्तरसहस्र
गायत्रीजपः। प्रातर्होमस्य षोडशांशमारभ्य सूर्योदयात्पूर्वं मुख्यः। उदितेपि सूर्ये आसायंहोमात् गौणः।
तत्रान्नादिष्टं दत्वा कार्यः। तत्रासंभवे लोपः। लोपे अष्टोत्तरसहस्रगायत्रीजपः। प्रायश्चित्तं। रजसाभ्र
भिकया अग्नेर्वा धूमेन वा वृक्षेण वान्येन कटादिना वा प्रच्छादिते सूर्ये संध्यामुद्दिश्य जुहुयादेव
संशयो न कार्यः। न तत्र होमलोपः। न कश्चिद्दोषः। सायंहोमं मत्वा होमे कृते सूर्यो यदि दृश्येत तत्पु
नः संध्यां संध्याकाले जाते कुर्यात्। ततोग्निम्परेणासाम्मुखवास्तिष्ठन् भवतन्नः समनसा विति मंत्रेणा
ग्निमुपतिष्ठेत ततः पुनः सायंहोमः। अथ समिधः प्रादेशमात्रा द्वादशांगुला या अवक्राः प्रदेशि
न्यंगुलीस्थूलाः कार्याः। अथ वर्ज्याः। ह्रस्वा दीर्घास्स्थूलतराः अतिसूक्ष्माः वक्राः त्वचाहीनाः

द्विशाखाः उर्ध्वंशुष्काः स्वयंविप्रशीर्णाः विदलाः पर्णशाखिना:।।अमेध्यकाकाद्युपहताश्चेति।अथवृक्षाः
पालाशः खदिरः शमीहिंग्वेतकः अश्वत्थः अर्कश्चेतसो।विकंकतः उदुंबरो बिल्वः एषामभावे वटः प्लक्षः
देवदारुः शालः शीतरुः वंजुलः भूर्जइति।अथवर्ज्याः।श्लेष्मातकः।शाल्मलिः।राजवृक्षः।बिभीतकः।
।।१६।। निंबः।कदंबः।कपित्थः बदरिकोविदारः।करंजः तन्तुः बिल्वश्चेति।प्रवासादागत्यश्राद्धभोजनाद् ।।१६।।
दसामर्थ्येनधिकारप्रतिपुत्रः उरः सोदरः भागिनेयः जामाताकन्यासुतः पौत्रः शिष्यः पितृव्यः।त
त्पुत्रः मातुलः पत्नीचकामंपंचमहायज्ञांश्चकुर्यात्।एषामभावेन्यः कश्चित्।होमंचतुर्नदाक्षस्याग्नि
समीपआगच्छेत्।तत्राप्यशक्तः स्वबद्धायाअधनात्तत्राप्यशक्तः स्ववद्धाअयानोपि।स्थागंदद्यात्।उत्तमश्रा
द्धान्नेरुद्रस्त्वापः पिबेत्।संध्याहोमेधिकारीभवति।सुतस्यहोम्यद्रव्यापचारेश्रान्तियावनान्तेस्यामा

कणोऽष्टमकंअङ्गुष्ठ्याःमरुशाअपिहोमार्थेसंभवंति।एभ्योन्येनिस्तुषाएवसमस्ताभवंति।व्रीह्यादिधान्यानां
शतकणपरिमितेकाहुतिःकार्याकंगूनांकणशतपरिमिता।दध्याज्यक्षीरपयसांशुक्तिपरिमिता।द्वयोर्यजमानस्यपत्न्यावा
संनिधानेपुत्रादिनाहोतव्यं।कस्यापिसर्वथाअसंनिधौऋत्विगादिरपिजुहुयात्।उभयहोमेहोतहोम्यसमिदादिनिय
मोनास्ति।अनपत्यपत्न्यायदिगर्भमात्मनोवांछतितदागर्भोत्पत्तिपर्यंतंवासंवत्सरपर्यंतंवादधितंडुलाक्षताना
मेवान्यतमेनपूर्वाहुतिंपत्नीजुहुयात्।तत्रैवंप्रयोगः।संकल्प्यांतपर्युक्षणांतेयजमानएवजुहुयात्।ततःपत्नीय
जमानगृहीतंउपयमनकुशांगृहीत्वास्थालीतोदक्षिणहस्तेनहोमद्रव्यंचदक्षिणजान्वाच्यजुहुयात्।अने
नमंत्रेण।पुमांसौमित्रावरुणौपुमांसावश्विनावुभौ।पुमानिंद्रश्चसूर्यश्चपुमांसंवर्ततांमयिपुनःस्वाहा।
इदंमित्रावरुणाभ्यामश्विभ्यामिंद्रायसूर्यायच।ततस्तमेवोपयमनकुशांगृहीत्वोत्तराहुतिंयजमानोजुहुयात्।

१ ॥श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं बलं श्रियं आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन॥ १

ततो जपः। नमस्करणं च। उद्धृत्याग्निं प्रच्छेदनं वारिणा मणिकस्य तु। पादप्रक्षालनं कृत्वा ब्राह्मणानुपविश्य

च। प्राणायामत्रयं कृत्वा कालज्ञानं तथैव च। गोत्रं च पितृनाम। निश्राद्धं कर्मसंकल्पमेव च। मातृपूजा ततः श्राद्धं संध्योपा

सनमेव च। अपरेणोपविश्याग्नेः पत्न्या सार्द्धं कुशैः कुशिः। प्राणायामत्रयं कृत्वा कालज्ञानं तथैव च। होमसंकल्प

॥१७॥ नं कृत्वा ऋष्यादिस्मरणं ततः। देवतानामभिध्यानं पात्राण्यासादयेत्ततः। कुशास्तरणं समित्क्षेपः पर्युक्षणमग्निं च वाग्य ॥१७॥

तः। प्रदीप्ते चाग्नौ वेद्यामान स्तु सजेपदिति॥ ॥इति प्रयोगपद्धतौ होमविधिः॥ ॥अथ पक्षादिकर्मप्रयोग उच्य

ते। तत्र प्रथमप्रयोगे आधानसमनंतरं प्रातः प्रतिपद्यां शुक्लायां वा कृष्णायां प्रातर्होमानंतरं स्वरस्थानादग्नेरेव

देशात्सुध्यस्य पंचभूसंस्कारान्विधाय महानसे स्थाप्य श्राद्धार्थं खंडं वैश्वदेवान्नार्थं पाकं स्वयं कार्यं। ततो ब्रा

ह्मणानामन्यमाध्यान्हिकं स्नानेन पाकं कृत्वा ग्रहपाकप्रोक्षणं देवतार्चनं निर्णेजनं तान्यं च महायज्ञांश्च इति

ॐ इत्येते वैश्वदेवेतु स्थालीपाकाः प्रकीर्तिताः ॥ अन्यत्र पितृयज्ञाच्च सोपराके यतस्मृतः ॥ १५

यादिप्रयोगे सर्वाह्णे पक्षादिकर्म सत्वा पंचमहायज्ञाः कार्याः ॥ निर्णजनांते आभ्युदयिकं श्राद्धं तत्र ब्राह्मणानुपवेश्य प्राणायाम
त्रयं कालज्ञानं च सत्वा अमुकशर्माभ्युदयिकं श्राद्धं मातृपूजनं सर्वं कर्म अहं करिष्ये। ततो मातृपूजनं श्राद्धं च ततः शुचिः सभा
र्यः प्राङ्मुखः पश्चादग्नेरुपविश्य प्राणायामत्रयं कालज्ञानं च। सत्वा परमेश्वरप्रीतये पौर्णमासिकं दार्शिकं वा पक्षादिकर्मा
हं करिष्ये। तत्र सर्वेण अग्निहरणोगमनं अग्नेरुत्तरतः पात्रासादनं पवित्रे द्वे। मृन्मयी आज्यस्थाली ताम्रमयी चरुस्थाली पालु
समीधः प्रांचावाघारौ समिद्धतमे आज्यभागौ वरो दक्षिणाए तान्वैकल्पिकान्यदार्थान् अहं करिष्ये। तत्र पक्षादिकर्मे मंत्रा
णां प्रजापतिरृषिः ते च छंदोहिनालिंगोक्ता देवता होमे विनियोगः। त्वन्नो अग्ने। सत्वन्नो अग्ने। अयाश्चाग्ने। ये ते शतमिति मंत्रा
णां वामदेवऋषिः त्रिष्टुप्छंदः सविता विष्णुर्विश्वेदेवा मरुतः। स्वर्का देवताः अनादिष्टहोमे विनियोगः। उदुत्तममिति सुनःशेप
ऋषीः त्रिष्टुप्छंदः वरुणो देवता पाशोन्मोके विनियोगः। तत्र प्रजापतिं इंद्रं अग्निं सोमं एता देवताः आज्येन अग्नीषोमौ अग्नी

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापति ऋषिः गायत्र्युष्णिगनुष्टुप् छंदः अग्निवायुसूर्यो

॥१८॥ षेमौ। अथदार्शिके। अग्निंविष्णुंइन्द्राग्नीएताः प्रधानदेवता। श्रपणाविश्वान्देवान्भूतगृहान्आकाशंएताः बलिभिश्चर

णा। अग्निंप्रजापतिंविश्वान्देवान्एतादेवताः वैश्वदेवान्नेनअग्निंस्विष्टकृतंवैश्वदेवान्नचरुशेषेणअग्निंवायुंसूर्यंअग्नी

वरुणौअग्नीवरुणौअग्निंवरुणंसवितारंविष्णुंविश्वांदेवान्मरुतस्वर्कान्वरुणंप्रजापतिंएतादेवताः आज्येन। स्विष्टंपुरं

संवयसंवयसंरुद्रंह्लसच्छदंतंपापीनां पतिं। येमेप्रजानुपलोभयंतिग्राम्यवसंतउवारण्ये। तेतान्एता। बलिभिश्चरणा। ॥१८॥

ता। अंगप्रधानार्थादेवताः अस्मिन्कर्मण्यहंयक्ष्ये। ब्रह्मवरणंप्रणीताप्रणयनंपरिस्तरणंपात्रासादनंतरंअनुच्छिष्टं

वैश्वदेवान्नासादनं। हंतकारादिसर्वंतेनैवकार्यंपवित्रकरणंप्रोक्षणीसंस्कारः पात्रप्रोक्षणंअसंचरेप्रोक्षणीनि

धानं। आज्यादिनिर्वापः। आज्याधिश्रयणंवरान्चरोश्चउभयोः पर्यग्निकरणं। चरोरेवाश्रयणं। स्रुवः संस्कारः। उ य

द्वासनमुभयोः क्रमेणोत्तरतउत्पवनाद्याज्यसंस्कारः प्रोक्षण्याः प्रत्युत्पवनं। उपयमनादानंसमिधाधानंपर्युक्षणं

पवित्रयोः प्रणितास्नुनिधानं जान्वाच्य ब्रह्मणोन्वारंभः स्नुवेणहोमः। ॐ प्रजापतये स्वाहा इदं प्रजापतये न ममेति अंते सर्वत्र
त्यागां ते द्रव्यप्रक्षेपः प्रोक्षण्यसंस्रवप्रक्षेपः। सर्वत्र। ॐ इन्द्राय स्वाहा इदं मिंद्राय। ॐ अग्नये स्वाहा इदमग्नये न मम। ॐ सो
माय स्वाहा इदं सोमाय। ततश्च रुष्णिघारणं। स्नुवेणावदाय। ॐ अग्नये स्वाहा इदमग्नये। ॐ अग्नीषोमाभ्यां स्वाहा इद
मग्नीषोमाभ्यां न मम। अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां। इति पौर्णमासे प्रधानदेवताः। अथ दर्शे। ॐ अग्नये स्वाहा
इदमग्नये। ॐ विष्णवे स्वाहा इदं विष्णवे। ॐ इन्द्राग्निभ्यां स्वाहा इदमिंद्राग्निभ्यां। उत्तरउत्तयत्रसमानं। ॐ ब्रह्मणे स्वाहा
इदं ब्रह्मणे। ॐ प्रजापतये स्वाहा। ॐ प्रजापतये। विश्वेभ्यो देवेभ्य स्वाहा इदं विश्वेभ्यो देवेभ्यो न मम। ॐ द्यावापृथिवीभ्यां स्वाहा
इदं द्यावापृथिवीभ्यां। ततस्त्यग्रेरुत्तरतस्त्रिलिवलिहरणानि प्राक्संस्थान्युदक्संस्थानि वा स्नुवेण। ॐ विश्वेभ्यो देवेभ्यो नमः इ
दं विश्वेभ्यो देवेभ्यः। ॐ भूतगृहेभ्यो नमः। इदं भूतगृहेभ्यः। ॐ आकाशाय नमः इदमाकाशाय। एतेषां त्रयाणां संस्रवप्रक्षेपो ३
न कर्तव्यः।

।।१९।।

ततोवैश्वदेवान्नमभिघार्य स्रुवेण होमः ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ ॐ विश्वेभ्यो
देवेभ्यः स्वाहा ॥ इदं विश्वेभ्यो देवेभ्यः ॥ एतेषां नित्यमेकैकाहिकारमतात् नेच्छति संस्रवाः वैश्वदेवान्नहो-
मतः ॥ कृत्स्नं सा वैश्वदेवान्नस्य चोत्तरार्द्धात् स्विष्टकृत् अन्वारब्धः ॥ अग्नये स्विष्टकृते स्वाहा ॥ इ-
दमग्नये स्विष्टकृते ॥ उदकोपस्पर्शः ॥ ततो भूरादिनवाहुतयः ॥ ॐ भूः ॐ भुवः ॐ स्वः ॥ त्वन्नः ॥
स त्वन्नः ॥ अयाश्चाग्ने ॥ ये ते शतं ॥ उदुत्तमं ॥ प्रजापतये ॥ इति नवाहुतयः ॥ संस्रवप्राशनं ॥ पवित्रा-
भ्यां मार्जनं ॥ अग्नौ पवित्रप्रतिपत्तिः ॥ ब्रह्मणे वरदानं ॥ ब्रह्मणस्य पूर्णपात्रादि कर्मणोङ्गत्या विहि-
तोयं वरः इति निर्दिष्टं प्रणीतोदकेन संकल्पः ॥ ततो द्यौः शान्तिरिति ब्रह्मा जपः ॥ प्रणी-
ताविमोकः ॥ आपः शिवेति मंत्रेण दुर्मित्रिया तस्योदकस्य वंदनं ॥ चरुशेषेण बाह्यतो बलिहरणं ॥

।।१९।।

उपलिप्ते शुचौ देशे प्राक्संस्थं उदक्संस्थं वा स्तुवेण कार्यं। नमः स्त्रियै इदं स्त्रियै। नमः पुंसे वयसे वयसे
नमः नमः शुक्लाय कृष्णदन्ताय पापीनां पतये इदं शुक्लाय कृष्णदन्ताय पापीनां पतये॥ नमो ये मे प्रजा
मुपलोभयंति ग्रामे वसन्त उत वारण्ये तेभ्यः इदं ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये ते
भ्यः। नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददतु इदमेभ्यः मणिकोदकेन चरुशेषमा
प्लाव्य ततो ब्राह्मणभोजनं अनुच्छिष्टपाकेन ब्राह्मणपादप्रक्षालनं उपवेशनं अर्चनं अ
न्नपरिवेषणं॥ ब्राह्मणाः अस्य पक्षादिकर्मणोंगतया विहितं भोजनं संपद्यतां मणिको
दकेन सेचनं। अनुच्छिष्टवैश्वदेवान्नेन नित्यश्राद्धं ब्रह्मयज्ञः हंतकारः देवतानैवेद्यं
बलिहरणानि अनुच्छिष्टवैश्वदेवान्नेन कार्याणि मातृविसर्जनं एवं पौर्णमासिके
दार्शिके च पक्षादिकर्म यावज्जीवं प्रतिपदि पूर्वाह्णे कार्यं दैवाद्रात्रमवशाद्वा प्रतिबंधात्
पौर्णमासिकपक्षादिकर्मासंभवे दार्शिकपक्षादिकर्मणः एवं करिष्ये दिने अनादिष्टं सर्वं

कार्यं एवं दार्शिकं पक्षादिकर्म पौर्णमासिकपक्षादिकर्मकालांतरे ॥ अनादिष्टं सत्वाकार्यं तत्राप्यसंभवे
लोपः लोपे अनादिष्टं उपवासः प्रायश्चित्तं संतु अपक्षादित्रयन्लोपे पुनराधानं एते पक्षादिक
र्मणी स्मृतं वे अनयोयोरारंभः अपवर्गलक्षणः संबंधो नास्ति आधानानंतरं यातु प्राप्यते प्रतिपत्ति
थिः शुक्लावाप्यसितानातस्याम्प्रातर्होमे कृते सति एवमाद्ये केदेशं तु एथक् अन्वाहार्यमहानसे
स्थापयित्वा पचेदन्नं गृह्यमिहेष्यते निमंत्रणं च विप्राणां नमानेमध्याह्निकं ततः देवता
र्चनं पंचमहायज्ञांश्च निर्वपेत् निर्णेजनांते विप्राणां पादप्रक्षालनादिकं श्राद्धं च मातरः एवं
स्यान्नु सपत्नीकः शुचिस्नातः संकल्पं च विकल्पं च ऋषिच्छंदोथदेवताः देवतानामभिध्यानं
ततो ब्रह्मवृतिस्तथा प्रणीतादिविमोकांते बाह्वकीबलिः पंचकं वारिणा च समुत्संप्राव्य ततो ब्रा
ह्मणभोजनं अनुच्छिष्टेन पात्रेण हन्तकारादिकं ततः यातु मातृगणाः सर्वे इति मातृविस ॥२०॥
र्जनं ॥ ॥ अथ पिंडपितृयज्ञः ॥ ॥ स च श्रौतोऽप्यनाहिताग्नेरप्येषः इति वचनाद्दोपासनि

मतिवरकव्यानादयोरकेशं २

नोपिप्राप्तः एतस्याधिकाराभावात् सत्यं चन्द्रादर्शनेऽमावास्यायां अपराह्णे प्रमीतपितृकस्यैव स्ता
ग्निसाध्यस्य भवति तत्र प्रथमप्रयोगे उपविष्टेषु ब्राह्मणेषु प्राणायाम कालज्ञानं गोत्रपितृनामोच्चारं च स्ता
पिंडपितृयज्ञारंभनिमित्तं आधानसमनंतरं या सा याममावास्यायां प्रातर्होमे कृतेषु दृष्टमहानसे
स्ता नांदीश्राद्धार्थं दर्शश्राद्धार्थं च पाकद्वयं कार्यं ततो माध्यान्हिकं वैश्वदेवं निर्णेजनांते निर्वर्त्य आ
भ्युदयिकश्राद्धं मातृपूजनपूर्वकं महं करिष्ये मातृपूजनं श्राद्धं च समाप्य शुचिः सभार्यः पश्चाद
ग्नेरुपविश्य प्राणायामान् कृत्वाऽग्नेरुत्तरतो दक्षिणाभिमुख उपविश्य ततः प्राचीनावीतीक
रणं नीवीबंधनं तद्यथा वामभागे परिधानांगवस्त्रदशानां बहिरुपगूहनं संगोपनं नीवीबंधनं
कालज्ञाने परमेश्वरप्रीतये पिंडपितृयज्ञं महं करिष्ये ततोऽग्निमपरेण पात्रासादनं दक्षिणेन च
रेखाकरणं एतेनान्नमिति पिंडदानं स्वच्छादनानि एतान् वैकल्पिकान्पदार्थानहं करी
ष्ये पिंडपितृयज्ञमंत्राणां प्रजापतिरृषिः अग्नये कव्यवाहनाय सोमाय पितृमतय इति द्वयपु
षी अग्निः कव्यवाहनः सोमः पितृमान् क्रमेण देवते अपहता इति यजुः असुरारक्षांसिदेव

ताः येसमानाइति त्रिष्टुप्छंदः पितरोदेवताः अत्र पितरइति पितरोदेवता बृहतीछंदः नमोवः
पितरइति षट् गृहान्नः पितरोदत्तेतिच सर्वाणि यजूंषि आद्यन्तेति गायत्रीछंदः पितरो
देवताः ऊर्जंवहन्तीति विराट्छंदः पितरोदेवता पिंडपितृयज्ञहोमेन्वेरवाकरणेतु लक्ष्युंकवि
॥२९॥ यानेजपेजं जलीकरणेजपेस्तवदानेमध्यमपिंडप्राशनेअपांनिषेके मेणावि॰ तत्र अ
ग्निं कव्यवाहनं सोमं पितृमंतं च रूणा काश्यपसगोत्र अस्मत्पितरं देवदत्तशर्माणं का
श्यपगोत्रं अस्मत्पितामहं यज्ञदत्तशर्माणं काश्यपगोत्रं अस्मत्प्रपितामहं अग्निदत्त ॥२९॥
र्माणं व्रीहिमयैः पिंडैरहं यक्षे आग्नेयकोणमारभ्य अपदक्षिणेन दक्षिणाग्रैर्द
र्भैः परिस्तरेणं पात्रासादनं अग्निमपरेणन्येन दक्षिणाग्राणि पात्राणि कुविन्नानि प्राक्स
स्थानि उत्तरेणन्येनू॥ आग्राणि दक्षिणाविन्नानि दक्षिणाग्रं स्थानि तु स्रुवं च स्रुचं स्
वरूपं चरुपात्रं उदकं आज्यं मेक्षणं वेणं उदपात्रं सर्वत्रछिन्नानिव्रीहिमयं कंस्त्राः
स्तत्राणि चेति ततः चरुपात्रासादनं सव्येन गृहीत्वा दक्षिणहस्तेन पात्रसहिता मंत्रं तूष्णीं

रेआदाय विकल्पेनकुत्रावदानं तूष्णींग्रहणं अवहननं निष्टतःसकृत्फलीकरणं सारतंडुलानादाय
अपसव्यं यथाभवतितथापवित्रेणतीर्थेनचरुपात्रेअभ्यात्मप्रक्षिपेत् तत्रतथैवासादितोदकोशेषः श्रपि
श्रपणं श्रपणं मेक्षणेनचालनंरत्वा रथक्षितेचरुं श्रपयेत् रथक्षेतस्याभिघारणं उद्वासनंद
क्षिणतः अग्नादक्षिण्येनानयनं सव्यजानुनिपातः मेक्षणेनहोमः अग्निमध्येप्रथमाहु
तिः तस्यदक्षिणतोद्वितीयाउभयोपूर्वस्तात् दक्षिणायमेक्षणं ॐ अग्नयेकव्यवाहनायस्वा
हा इदमग्नयेकव्यवाहनाय ॐ सोमायपितृमतेस्वाहा इदंसोमायपितृमते मेक्षणप्रक्षेपः
सक्केअपाहताइत्यनेनमंत्रेणाग्निमपरेणदक्षिणेनवोल्मुकेरवाकरणं वज्रेणउदकेउपस्पर्शनम्
येरूपाणीत्यनेनमंत्रेणोल्मुकेरवायांदक्षिणतः उल्मुकनिधानं पुनःअपस्पर्शनं उदकपात्रे
णअवनेजनं दक्षिणसंस्थरेखायां काश्यपगोत्रअस्मत्पितः देवदत्तशर्मन् अवनेनिक्ष्व
काश्यपगोत्रअस्मत्पितामह यज्ञदत्तशर्मन्अवनेनिक्ष्व काश्यपगोत्रअस्मत्प्रपितामहअग्निदत्त
शर्मन्अवनेनिक्ष्व उदपात्रेणरेखायांदक्षिणसंस्थप्रतिप्रपांगत्रिर्निषीचेत् रेखायांद

क्षिणाग्रास्तरणं उपस्तरं सकृदाच्छिन्नानां चरुशेषस्य पिंडत्रयं कृत्वा सकृदाच्छिन्नानामुपरि
पिंडदानं काश्यपगोत्र अस्मत्पितः देवदत्तशर्मन् एतत्तेन्नं स्वधा इदं काश्यपगोत्राय अस्म
त्पित्रे देवदत्तशर्मणे न मम काश्यपगोत्र अस्मत्पितामह यज्ञदत्तशर्मन् एतत्तेन्नं स्वधा
इदं काश्यपगोत्राय अस्मत्पितामहाय यज्ञदत्तशर्मणे न मम काश्यपगोत्र अस्मत्प्रपि
तामह अग्निदत्तशर्मन् एतत्तेन्नं स्वधा इदं काश्यपगोत्राय अस्मत्प्रपितामहाय
अग्निदत्तशर्मणे न मम अत्र पितरः इति जपः उदङ्मुख आ श्वासधारणादास्ते आ
वृत्यामीमदंत इति जपः एवं वदवनेजनं नीवीविसर्जनं नमो व इति षट् सूक्तैः अंजलिक
रणं गृहान्नः इति जपः एतद्वः पितर इति मंत्रेण वासोग्रात्रिणी सूत्रं वा क्षिपेत् इति पिंडं ददाति
ऊर्जं बिभ्रतीः पानीनयनं पिंडस्थले पिंडोद्धरणं स्थाल्यां अवघ्राणं सकृदाच्छिन्नानाम
ग्नौ प्रक्षेपः उल्मुकस्य च ततः सव्यकरणं उदकोपस्पर्शनं ये समानाः इति मंत्रात्
विसर्जनं ततो दर्शश्राद्धान्तरं ते नित्यश्राद्धं वा ब्रह्मयज्ञः हंतकारः देवतानैवेद्य बलि

हरणानिधायसादीनां ब्राह्मणभोजनंचेति ॥ आधानानंतरंमासंयामा यास्या
मे वेदिहे प्रातर्हेमिकृ तेतस्यांरवदादग्निंसमुद्धरेत् ॥ अथ कपालद्वयंकार्यंनांदी
दर्शार्थमेवच निःस्वनिर्णेजनंतस्यान्मातरो नांदीकेततः उपविश्यसपत्निकः
प्राङ्मुखोग्नेपरेणतु प्राणायामत्रयंकृत्वाततोदक्षिणादिङ्मुखः उपविश्योत्तरे
णाग्नेरुपसव्यंकरोत्यथ नीवीबंधंस्मरेत्कोलु संकल्पश्चविकल्पिकाः स्वधा
दिस्मरणंकार्यंदेवतादिष्विहितिस्त्वथ परिस्तरणमग्नेश्चपाद्यासादनमेवच
मुसलोलूखलंशूर्पंचरुपात्रंमन्थघृतं मेक्षणंचततोवज्यवारिपात्रंतथै
वच सस्रोहार्छिन्नाद्भर्भाश्च व्रीहयःस्रुचमेवच स्रुवस्तकं ज्यपक्लीकृत्य
क्षिप्याभ्याभ्यपरीकरणात् गृहीत्वाचरुपात्रेतान् संतु कृत्वान्वारिसेचयेत्
स्थब्धृतेघृतंतांक्षिहवातन्मुखास्यंतुदक्षिणे अंपादक्षिण्यमाहृत्यदक्षिणा

२२ शामुख्योग्रहः॥ जानुमन्वाच्यसव्यं च मेक्षणेन जुहोतिसः आहुतीमेक्षणं
स्य लेखाभ्रमणं तु कुर्यात् अवनिज्य च लेखायां सकृदाच्छिन्नसंस्कृतिः॥
पिंडदानं जपो ऽथ चेति स्फटं ज्ञातस्तेसु पारणात् आचम्यामीमदंतेति जप्त्वा
न्यावनेजनं नीवीविस्रंस्य सन्नं कुर्यादंजलीन्यूषग्रहणे तूजपं चेत द्वइति
स्यापिजलं चोर्जमिति निक्षिपेत् पिंडानुद्धृत्य पात्रेतान्नेन जिघ्रेत्स्वयं प्रभुः
अत एव मयासादवत्र प्राणं विलुप्यते सकृदाच्छिन्नदर्भोऽथ जास्येदपोततो
हुतं सक्यासव्यं स्रद्रोदंत्विस्रजनं मन्त्रेणगतं दर्शश्राद्धं च नित्यं च प्रभ
लयज्ञः सहेतरः नैव पूर्वबलिद्वानादि भोजनं चैत्यपंचमः मातरो नांदि
के श्राद्धे तथा मातृविसर्जने न्यापो गेमप्रथमे चैतन्नूचितयंन मुनः केचित्तु॥
पिंडयज्ञस्यमावास्यायुक्तं तुरव्यकालो नगौणः कालोक्तिअतस्त्वमावास्या

२२

नध्वर्युर्यजमानो वा ॥ अग्निमष्टाकपालेन पुरोडाशेन ॥ अग्नीषो
मावेतराज्येनोपांशु ॥ अग्नीषोमावेकादशकपालेन पुरोडाशेन ॥ रो
सयोर्हं यक्ष्ये ॥ तत्र पंचदशोवजाः ॥ यवै र्यागः ॥ व्रीहिभिर्वा ॥ ममा
ग्नेपक्षः ॥ उत्तमे काले व्रतोपायनं ॥ एके च न वैकल्पिकपदा
र्थास्ते ऋत्विक्प्रत्ययेन मयावधारिताः ॥ ॐ ममाग्ने वर्चो
विहवेष्वस्तु वयं त्वेंधानास्तन्वं पुषेम ॥ मह्यं नमंतां प्रदिशश्च
तस्रस्त्वयाध्यक्षेण पृतना जयेम ॥ आहवनीये समिधमाधायोदे
ति ॥ तूष्णीं द्वितीयां ॥ एवमितरयोरग्न्योः ॥ महाव्याहृतिभिर्वा ॥

॥२॥ गार्हपत्यदक्षिणाग्न्याहवनीयेषु ॥ तूष्णींवा ॥ गार्हपत्याहवनीयदक्षि
णाग्निषु ॥ युगपत्समिदाधानं मंत्राभावात् ॥ अहर्निमासंसमेषु नेव
र्जयेत् ॥ संकल्पः ॥ अमावास्यायामशिरवं वपनं वा ॥ अग्निमष्टा
कपालेनपुरोडाशेन ॥ विष्णुं अंतराज्येनोपांशु ॥ इंद्राग्नी द्वादशक
पालेनपुरोडाशेन ॥ चोहं यक्ष्ये ॥ सान्नाय्यपक्षेरंद्रं पयसा दध्ना
चेति विशेषः ॥ ततो वैश्वदेवः ॥ ततः पिंडपितृयज्ञः ॥ दर्शश्रा
द्धं प्रातरिष्टिः ॥ सद्यो वा पौर्णमास्यां ॥ षडासनं ॥ ब्रह्मयजमा
नयोः ॥ प्रणीतापत्न्योश्च ॥ उदङ्मुखो यजमानः ॥ प्राङ्मुखं ब्र

त्वाणं वरणी तेब्रह्मि ष्ठं॥ॐ भूपते भुवनपते महतो भूतस्य पते ब्रह्मा
णं त्वा वरणीमहे॥ वृतो जपति॥ॐ अहं भूपतिरहं भुवनपतिर्म रहं र
हतो भूतस्य पति र्भूर्भुवः स्वर्देव सवितरेते त्वा रणते बृहस्प
तिं ब्रह्माणं तदहं मनसे प्रब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टु
भे त्रिष्टुप् जगत्यै जगत्यनुष्टुभेनुष्टुप्प्रजापतये प्रजापति
र्विश्वेभ्यो देवेभ्यो बृहस्पति र्देवानां ब्रह्माहं मनुष्याणां॥ॐ
वाचस्पतये यज्ञं गोपाय॥इत्याह॥ब्रह्मा॥ॐ गोपायामि॥अप
रेण वाहवनीयं दक्षिणा तिक्रामति॥ॐ अहं दैविषव्यो दतस्ति

२२॥

छान्यस्य सदने सीदयोस्मत्पाकतरः॥ब्रह्म सनमीक्षते॥ब्रह्मसद
नात्तृणंनिरस्यति॥ॐ निरस्तः पराव्रासहतेनयंद्विष्मः॥उद॥
ॐ इदमहं ब्रह्मस्तैः सदसि सीदामि प्रसूतो देवेन सवि
त्रा तेदग्नये प्रब्रवीमि तद्वायवे तत्सूर्याय वे॥ब्रह्मसदने॥
आहवनीयमभिमुखउपविशति॥वाग्यतः॥आनुयाज
प्रसवाभ्यागपरिहरणादिवा॥गार्हपत्यमुत्तरेणोदपात्रंनि
धायालभते॥ॐ भूतस्याभूतकरिष्यामि॥ब्रह्मन्नपः प्रणेष्या
मि॥यजमानवाचयद्धं॥ॐ प्रणयजज्ञं देवतावर्द्धयत्त्वंना

पश्चाद्यजमानो वेदिस्पृक् ४

कस्य प्रष्ठे यजमानोऽस्त्वस्तु ॥ सप्त ऽ सषीणां ७ सुकृतां यत्र लोकस्त
त्रेमं यज्ञं यजमानं च धेहि ॥ ॐ प्रणय ॥ प्रणीताः प्रसौति ॥ अनुज्ञा
त उत्तरेण आहवनीयं संप्रतिनिदध्याति कस्त्वे ति ॥ ॐ कस्त्वा
युनक्ति स० क० तस्मै त्वा युनक्ति ॥ तृणैरग्नीन् परिस्तीर्य पुर
स्तात्वथ मं ॥ द्विषः पात्राणि सं सादयति यजमानो वा ॥ ।
शूर्पाग्निहोत्र हवणी ॥ स्फ्यः कपालानि ॥ शम्यास्कृष्णाजिनं ॥
उलूखल मुसलं ॥ दृषदुपलं ॥ पात्रीपवित्रछेदनानि च ॥
पवित्रे उपवेषश्च ॥ आज्यस्थाल्युपसर्जनी पात्रं च ॥ कुशमु

॥५॥ ष्टिरन्वाहार्यपात्रं च॥ वेदितृणमग्निरध्मा॥ योक्त्रं स्रुव स्रुच॥ जु
तं हूपर्नं च॥ ध्रुवा सन्नहनाव छादनानि च॥ परिचयो विध्यो
च॥ आज्यं पुरोडाश पात्री च॥ होतृषदनं प्रतोवदानं च॥
औषधं प्राशित्रहरणे च॥ अन्वाहार्यं तंडुला अंतर्दानिकट
ध्मा॥ पूर्णपात्रं पक्षे समिद्वयं च॥ रध्माबर्हि षोरुपकल्प
नीयं षडवत्तं च॥ गार्हपत्यस्य पश्चात्स्फ्यो पहिता यां पात्र्या
मौषधकरणं॥ कर्मणे वामिति पूर्वाग्निहोत्रहवण्यादाय॥
ॐ कर्मणे वां वेषाय वां॥ आददे॥ वाचं यच्छति॥ तयोरेवप्रत

पनं प्रत्युष्टं निष्टप्त मितिवा॥ ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः॥
उदं॥ गच्छतु र्वंतरिक्षमिति॥ ॐ उर्वंतरिक्षमन्वेमि॥ श्रपण
स्यपश्चादुपविश्य॥ धूःशीषारोहणानि पात्रीबिले जपति॥
ॐ धूरसि धूर्व धूर्वंतं० कोषीतु॥ ॐ विष्णुस्त्वाक्रमतां॥ प्रेक्षते उ
रुवातायेति ह विष्ण्यान्॥ ॐ उरु वाताभव॥ अपहतमिति निर
स्य सन्यन्॥ ॐ अपहतꣳ रक्षः॥ उदं॥ अविद्यमाने भिद्र
रोत्॥ यच्छंतामिस्या लभते॥ ॐ यच्छंतां पंच॥ देवस्यत्वेति गृह्णा
त्याग्नेयं चतुरो मुष्टीन्॥ ॐ देवस्य त्वा सवितुः प्र० हस्ताभ्यां॥

॥५॥ ॐ अग्नये जुष्टं गृह्णामि॥ प्रथमं॥ ॐ देवस्य० हस्ताभ्यां॥ ॐ अ
ग्नये जु०॥ द्वितीयं॥ ॐ देवस्य० भ्यां॥ ॐ अग्नये जु०॥ तृतीयं॥
तूष्णीं चतुर्थं॥ एवमग्नीषोमीयं॥ ॐ देवस्य० भ्यां॥ ॐ अग्नीषो
माभ्यां जुष्टं गृह्णामि॥ प्रथमः॥ ॐ देवस्य त्वा०॥ अग्नीषोमा
भ्यां जुष्टं गृह्णामि॥ द्वि०॥ ॐ देवस्य॥ अग्नीषोमाभ्यां॥ तृतियं॥
तूष्णीं चतुर्थं॥ यथादेवतमन्यत्०॥ भूतायत्वेति शेषाभिमर्शनं॥
ॐ भूतायत्वानारातये॥ परिशेषयामि॥ स्वरित्ति प्रक्षीक्षते॥
ॐ स्वरभिविख्येषं॥ दृंहंतामित्सुस्थानं॥ ॐ दृंहंतां दुर्याः
॥१५॥

पृथिव्यां ॥ गछसुर्वंतरिक्षमिति ॥ ॐ उर्वंतरिक्षमन्वेमि ॥ प्र
पणस्य पश्चात्सादयति पृथिव्यास्त्वेति ॥ ॐ पृथिव्यास्त्वा
नाभौ॰ रक्ष ॥ कुशौ समावप्रशीर्णाग्रावनंतर्गर्भौ कुशौ छि
नत्ति पवित्रे स्थ इति ॥ ॐ पवित्रे स्थो वैष्णव्यौ ॥ हविर्ग्रहणया
मपः स्रुक्स्था ताभ्यां पुनाति सवितुर्व इति ॥ ॐ सवितुर्वः प्र
सव उत्पु॰ रश्मिभिः ॥ ताः स्थानांतरयोः सव्येहस्ताद्दक्षिणे
नोद्दिंगयति देवीराप इति ॥ ॐ देवीरापो ऽअग्रेगुवो ऽअग्रे
पु॰ युयमिंद्रमवृणीध्वं वृत्रतूर्ये ॥ प्रोक्षितास्येति तासां प्रोक्षणं ॥

[illegible]

ॐ प्रोक्षितास्थ ॥ हविश्च ॥ ब्रह्मन्हविः प्रोक्षिष्यामि ॥ ॐ प्रोक्ष
यज्ञं देवताकं धेहि ॥ ॐ प्रोक्षा ॥ अग्नये त्वा ॥ ग्नीषोमाभ्यां त्वेति ॥
ॐ अग्नये त्वा जुष्टं प्रोक्षामि ॥ ॐ अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षा
